National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 22-24
© 2019 NJHSR
www.sanskritarticle.com

**SANDYALA SUJATHA**
Research scholar, Dept. of Sanskrit,
R. U. University, Kurnool

**Correspondence:**
**SANDYALA SUJATHA**
Research scholar, Dept. of Sanskrit,
R. U. University, Kurnool

# लिङ्गपुराणे शिवप्राशस्त्यम्

**SANDYALA SUJATHA**

शिवमाहात्म्यप्रतिपादकेषु पुराणेषु स्कन्दपुराणं, शिवपुराणं, लिङ्गपुराणमिति त्रयाणां प्रत्येकस्थानं वर्तते । तेष्वपि स्कन्दपुराणं सप्तखण्डात्मकं अनेक देवतान्तर क्षेत्रान्तर माहात्म्यप्रतिपादकं वर्तते । स्कन्दपुराणेपि केवलं माहेश्वरखण्डे काशी खण्डे च शिवमाहात्म्यं प्रतिपादितम् । तत्रापि काशीखण्डं दिक्पाल आदि नाना कथासंकीर्णं क्षेत्रमाहात्म्यधिक्यसमेतं च । शिवपुराणं अपि रामायणादि नानाविध पुराणकथा समेतं शिवमाहात्म्य प्रतिपादने लिङ्गपुराणात् लघिष्ठमेव । अतः केवल शिवमाहात्म्य प्रतिपादकेषु पुराणेषु लिङ्गपुराणं सर्वोत्तमम् । यद्यपि तत्र तत्र आख्यानान्तराणि धर्मव्याधकथादि रुपाणि महाभारतादिभ्यः गृहीतानी लिङ्गपुराणेपि दृष्टानि तानि शिवमाहात्म्याङ्गभूतानि प्रमाणेन न गण्यानि च । लिङ्गपुराणे महेश्वरस्य चन्द्रशेखरादि आकारवर्णनात् महिमावर्णनादपि महेश्वरस्य विश्वव्यापित्वं विराट् रुपत्वं च मुख्यतया वर्णितम् । महेश्वरात् अन्यस्मिन् देवे लिङ्गं बेरमिति रुपद्वयं न दृष्टम् । अतः महेश्वरः देवतान्तरेभ्यः श्रेष्ठः इति पुराणे प्रतिपादितम् । लिङ्गपुराणस्य मङ्गलाचरण श्लोके एव शिवमाहात्म्यं श्रुतिप्रमाणयुक्तं महत्तर उपवर्णितम् ।

**ऒं नमः शिवाय**
**नमो रुद्राय हरये ब्रह्मणे परमात्मने ।**
**प्रधानपुरुषेशाय सर्गस्थित्यन्तकारिणे ।।**(लिङ्गपुराणम् – 01/01)

अत्र महेश्वरपर्यायाः रुद्रः, हरिः, ब्रह्म, ब्रह्मा, परमात्मा, प्रधानं, पुरुशः, ईशः, सर्गस्थित्यन्तकारि इति विशेषणानि प्रयुक्तानि । आदौ प्रयुक्तः “नमः शिवाय” इति पञ्चाक्षरी मन्त्रोपि विशेषमहिमा सम्पन्नः । तस्य मन्त्रस्य महिमा पुराणे पृथगध्यायेषु उपवर्णितः (85 अध्याये) । अत्र यानि विशेषणानि प्रयुक्तानि तेषां सम्बन्धिन्यः सर्वाः कथाः विस्तरेण पुराणे प्रतिपादितः इति एतेषां विवृतिरेव लिङ्गपुराणोक्त शिवमहिम्न प्रतिपादने पर्याप्ताभवति ।

**1.रुद्रः –**

सोरोदीत् रुद्रस्य रुद्रत्वं प्रजापतिः रोदनात् रुद्रः इत्यादि मन्त्राः शिवस्य रुद्रनामसार्धक्य प्रतिपादकाः।रुदिर अश्रुविमोचने इति धातोः रोदयति इति विग्रहे हेतुमति च (3/1/26) इति प्रेरणे णिच् प्रत्यये रोदेर्णिलुक् च (32/22) इति णेः लुकि रुद्रः इति रुपं भवति । णिच् लुकालुप्तत्वात् नलुमताङ्गस्य (1/1/63) इति उपधा गुणनिषेधः । रोदयति रुद्रः इति अर्थः पुराणेपि गृहीतः । रोदत्थात्मकिमुखान् इति रुद्रः प्रकीर्तितः ।

ये च जनाः ईश्वरपूजने स्मरणे वा विमुखाः भवन्ति तान् रोदयति इत्यर्थः । लिङ्गपुराणे एवं विधाः कथाः बहवो निरुपिताः दक्षः एवात्र उदाहरणम् । दक्षः परमेश्वरं पराभूय देवतान्तरैः यष्टुं प्रवृत्तः दधीच्यादि महर्षिभिः प्रोक्तं हितमपि श्रोतुं विमुखः । वीरभद्रेण शिवावतारेण दक्षयज्ञो नाशितः दक्षश्च हृतशिरस्कः पश्चात् मेषशिरसा योजितः । (लि.पु. -100 अध्याये द्रष्टव्यः)

**2.हरिः –**

हरति पापान् इति हरिः हृञ् – हरणे इति धातोः अच इः इत्यौणादिकः इप्रत्ययः । भक्तानां पापानि हरतीति हरिः हरि शब्दः पुराणेषु नारायणपरतया रुढोपि यौगिकः अत्र गृहीतः। विष्णुसहस्रनामसु

**यानि नामानि गौणानि विख्यातानि महात्मनः।**
**ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये।।**

(वि.सह्र.पू.17)

शङ्करभगवत्पादैः सहस्रनामभाष्ये रुढ्यर्थ भिन्नानां शब्दानां गौणत्वं व्याख्यातम्। गौणं गुणतः विख्यातरं इति शङ्कराचार्येण व्याख्यातम्।

परमेश्वरपूजनेन पापहरणं जन्मान्तरकृतानामपि उपशमः भविष्यतीति शिवपूजा निरुपणे लिङ्गपुराणे विस्तरेण प्रतिपादितम्।(लि.पु. – 74-77 & 82-84 अध्यायाः द्रष्टव्यः)। यथा –

**ओं नमो नीलकण्ठाय इति पुण्याक्षराष्टकम्।**
**मन्त्रमाह सकृद्वा यः पातकैः सविमुच्यते ।।**

(लि.पु. – 76/44)

अत्र सकृदपि इति अर्थापत्या शिवमहत्वसूचकं संख्यायाः क्रियाभ्यावृत्ति गणने एकशब्दात् सुच् प्रत्ययः सकृत् आदेशश्च (एकस्य सकृच्च - 5/4/19) पाणिनीये विहितः। एकवारमपि ओं नमोनीलकण्ठाय इति मन्त्रमुच्यार्थ सर्वैभ्यः मुक्तो भवतीति किं पुनः सदा शिव जपपरः पापेभ्यः न मुक्तो भवति इति अर्थापत्तिः।

**3.ब्रह्म –**

ब्रह्मन् शब्दः लिङ्गभेदेन अर्थद्वय प्रतिपादकः ब्रह्मतत्त्वं तपो वेदः ब्रह्मा-विप्रः, प्रजापति। प्रथमं नपुंसकलिङ्गे वेदपरः भगवान् परमेश्वरः सर्ववेदमयात्मकः। दधीचिकृत शिवस्तोत्रे (100 अध्याये) महेश्वरस्य सर्ववेदमयत्वमुपवर्णितम्।

**4.ब्रह्मा –**

परमेश्वरः एव गुणत्रयरुपं प्राप्य सत्वगुणाश्रितः विश्व पालयति। रजोगुणश्रितः विश्वंसृजति, तमोगुणाम् आश्रित्य लोकं संहरतीति पुराणे प्रतिपादितम्। प्रथमाध्यायान्ते लिङ्गमाहात्म्यवर्णने शिवस्य सर्ववेदमयत्वं सृष्टि स्थितिलयकारत्वं च विस्तरेण निरुपितम्। शिवतोषिणी व्याख्यायां तत्समर्थकं श्रुतिप्रमाणमपि दर्शितम्।(01/19-24)

**5.परमात्मा –**

अतः सातत्यगमने इति धातोः आत्मन् शब्दः निष्पन्नः। परमश्चासौ आत्मा च परमात्मा यश्च यस्य मूलकारणं स तस्य आत्मेति उच्यते। ध्वनिः काव्यात्मा इतिवत् स्थितिहेतुरित्यर्थः अध्यात्मविषये आत्मन् शब्दः सर्वोत्तम देवपर्यायः। क्षेत्रज्ञ, आत्मा, पुरुषः इति अमरः सातिभ्यां मनिन्मनिणौ (उ 4/153) इति मनिण्

**आत्मा चित्ते धृतौ यत्नं धिषणायां कलेवरे।**
**परमात्मनि जीवेऽर्के हुताशनसमीरयोः ।।**

(अमर.01/4/28)

आत्मैव परमात्मा स्पष्ठप्रतिपत्तये समासः। यः सृष्टेः कारणं स पुरुषः यः सर्वजीवमयः स क्षेत्रज्ञः क्षेत्रं भौतिकं वस्तु तज्जानातीति क्षेत्रज्ञः। क्षीयते क्षेत्रम्। क्षेत्रं च शरीरमेव। इदं शरीरं "कौन्तेय क्षेत्रमित्यभिधीयते" इति गीतावचनम्। अतः सर्वान्तर्यामि सर्वज्ञः सृष्टिकारणं च यो भवति स परमात्मा। लिङ्गपुराणे ईश्वरक्य परमात्मत्वं बहुधा प्रतिपादितम्। जगत्कारणत्वं सांख्ययोगे निरुपितम्। शिवः पञ्चविंशति तत्वात्मकः इति पुराणे बहुषु स्थलेषु निरुपितम्। सप्ततितमाध्यायादारभ्य कतिपयेषु अध्यायेषु परमेश्वरस्य सृष्टिकारणत्वं उपवर्णितम्। द्विसप्ततितमे अध्याये त्रिपुरासुरसंहारकाले या भगवतः संग्रामसामग्री वर्णिता सा वास्तवरुपेण महादेवस्य विराट् स्वरुप वर्णनात्मिका एव। पञ्चचत्वारिंशे अध्याये सूतः रुद्रस्य सर्वात्मभावत्वं एवं उपवर्णितवान्। भूलोकः भुवलोकः स्वर्लोकः जनोलोकः तपोलोकः सत्यलोकश्चेति सर्वे उर्ध्वलोकाः शिवेनैव व्याप्ताः। एवं पातालादयः अधोलोका अपि नक्षत्र ग्रह चन्द्रार्काः ध्रुवः सप्तर्षयः अन्ये च देवाः ईश्वरप्रसादेनैव स्थिराः भवन्ति। अतएव सर्वात्मा महादेवो भवति। जगतयमेव तस्य शरीरं एवं उक्त्वा सीतः शिवशरीरात्मकं सप्तद्वीपादि तत्त्वं उपवर्णितवान्। एवं अष्टदिक्पालानां पुराणि कुलपर्वता इत्यादीनां स्वरुपमपि शिवात्मकमेवेति निरुप्य सर्वेलोकाः ईश्वरस्वरुपाणां तत् तत् स्थलेषु निवासं उपवर्णितवान्।

**तेषु शैलेषु दिव्येषु देवदेवस्य शूलिनः।**
**असंख्यातानि दिव्यानि विमानानि सहस्रशः ।।**
**नन्दीश्वरो गणवरैः स्तूयमानो व्यवस्थितः।**
**सन्तानकस्थलोमध्ये साक्षाद्देवी सरस्वती ।।**

(लि.पु. – 49/57,68)

सूर्यः कर्मसाक्षी जगतः भूत्वा प्रतिमासं एकेन नाम्ना लोकानां शुभं विददाति। अतएव जगतामात्मा इति लिङ्गपुराणे प्रतिपादितम्। सूर्यः जगतामात्मा इत्यत्र "सूर्य आत्मा जगतः तस्तुषश्च" इति श्रुतिः प्रमाणम्। अयं च सूर्यः ईश्वरस्य दक्षिणं नयनमिति एकोनषष्ठितमेऽध्याये स्पष्ठमुक्तम्।

(लि.पु. – 59/32-45)

समग्रे एकोनषष्ठितमेऽध्याये समस्तस्य ब्राह्मण्डस्य शिवस्वरुपत्वं उपवर्णितम्। तत्र तेषां ग्रहादीनां शिवमयत्वं शिवशरीराङ्गत्वं शिवस्वरुपत्वं च निरुपितम्। देवानां महामहिमत्वात् सर्वमयत्वं सर्वरुपत्वं च सिद्धमेव।

**सवने स्यन्दनेऽर्थे च धातुरेष विभाष्यते।**
**सवनात्तेजसोऽपां च तेनासौ सविता मतः ।।**
**बहुलश्चन्द्र इत्येष ह्लादने धातुरुच्यते।**
**शुक्लत्वे चामृतत्वे च शीतत्वे च विभाव्यते ।।**
**सूर्याचन्द्रमसोर्दिव्ये मण्डले भास्वरे खगे।**
**जलतेजोमये शुक्ले वृत्तकुम्भनिभे शुभे ।।**
**घनतोयात्मकं तत्र मण्डलं शाशिनः स्मृतम्।**
**घनतेजोमयं शुक्लं मण्डलं भास्करस्य तु ।।**
**वसन्ति सर्वदेवाश्च स्थानान्येतानि सर्वशः।**
**मन्वन्तरेषु सर्वेषु ऋक्षसूर्यग्रहाश्रयाः ।।**
**तेन ग्रहागृहाण्येव तदाख्यास्ते भवन्ति च।**
**सौरं सूर्योऽविशत्स्थानं सौम्यं सोमस्तथैव च ।।**
**शौकं शुक्रोऽविशत्स्थानं षोडशार्चिः प्रतापवान्।**
**वृहद्बृहस्पतिश्चैव लोहितश्चैव लोहितम् ।।**

(लि.पु. – 60/4-10)

ब्रह्मापि शिवाज्ञयैव प्रभवति इति अष्टपञ्चाधे अध्याये प्रतिपादितम्। न केवलं शिवः शिवप्रतिपादकः पञ्चाक्षरीमन्त्रः औंकारश्च महाप्रभाव युक्त इति पञ्चाशीतितमे अध्याये प्रतिपादितम्। एवं शिवस्य परमात्मत्वं प्रतिपाद्यापि पुनः सृष्टेः

शिव एव कारणमिति निरुपयितुं प्रधानमित्यपि विशेषणं प्रयुक्तम्।

**6.प्रधानम् –**

सांख्यानां मते पुरुषः प्रधानं प्रकृतिः स्त्रीरुपा शिव एव आत्मानं द्विधा विभज्य प्रधानरुपः प्रकृतिरुपश्च बभूव। निर्गुणः परमेश्वरः आत्मानं द्विधा विभज्य पुरुषरुपिणं स्त्रीरुपिणं च कृतवान्। पुनः सगुणोभूत्वा तामेव स्वस्य स्त्रीरुपां सतीं सृष्टवान् द्वितीयस्मिन् जन्मनि सैव पार्वती बभूव।

**वचनाद्वो महाभागाः प्रणम्योमां तया भवम्।**
**सा भगाख्या जगद्धात्री लिंगमूर्तिस्त्रिवेदिका ।।**
**लिंगस्तु भगवान्द्वाभ्यां जगत्सृष्टिर्द्विजोत्तमाः।**
**लिंगमूर्तिः शिवो ज्योतिस्तमयश्चोपरि स्थितः ।।**
**तं दृष्ट्वा संस्थितं देवमर्धनारीश्वरं प्रभुम्।**
**तुष्टाव वाग्भिरिष्टाभिर्वरदं वारिजोद्भवः ।।**
**विभजस्वेति विश्वेशं विश्वात्मानमजो विभूः।**
**ससर्ज देवीं वामाङ्गात्पत्नीं चैवात्मनः समम् ।।**

(लि.पु. – 99/6,7,11,12)

प्रधान प्रकृतिभ्यां सप्तप्रकृतिविकृतयः षोदश केवलविकृतयः इति पञ्चविंशतितत्वानि मतान्तरेण षड्विंशति तत्त्वानि।

(लि.पु-28/23)

**मूल प्रकृतिर्महानहङ्कारो मनश्च पञ्चतन्मात्राणि।**
**पञ्चबुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्चमहाभूतानिति।।**

(किरातार्जुनीयम् – 3/26)

**7.पुरुषः –**

पुरुषः परमात्मा इति प्राक् निरुपितः।

**8.ईशः –**

ईशः नियामकः समर्थः प्रभु इत्यादयः तुल्यार्थकाः शिवाधीनात्रः सर्गादिषु प्रभवन्तीति पुराणे बहुधा निरुपितम्।

**9.सर्गस्थित्यन्तकारि –**

सर्गः सृष्टिः स्थितिः प्रतिष्ठा अन्तोलयः इति जगत्प्रवृत्ति कारणानि तत्र प्रथमं जीवकर्मफलानुसारेण लयः निश्चीयते। ततः अस्य जीविनः इयदायुः एषा जीवनरीतिः इति स्थिति निश्चयः। अन्ते सृष्टिरिति उत्पत्तौ जगतः प्रतिलोमक्रमः प्राणिनां आयुषो निर्णेता मृत्युञ्जयः शिवः एव। ब्राह्मादीनपि तत् तत् कालावधिकान् स एव सृजति अन्ते संहरते च। कर्मणा अल्पायुषानपि चिरञ्जीविनः कर्तुं स एव प्रभवति इत्यत्र श्वेतनामकः ऋषिः उदाहरणम्। स च जनुषा अल्पायुः अपि शिवमाराध्य चिरञ्जीवित्वं प्राप्तवान्। तद्विषये तं रक्षितुं शिवः कालकालोपि बभूव इति कथा अत्रैव पुराणे 30 अध्याये वर्णिता। गुणत्रयं स्वीकृत्य सर्गादिकार्यं निर्वहतीति प्राक् प्रतिपादितम्। एवं लिङ्गपुराणे अनन्तः भगवतो महिमा बहुधा वर्णितः। प्रतिविषयं विवृतिः पुनः पुराण प्रवचनमेवेत् अलं विस्तरेण।

षष्ठे अध्याये उत्तरार्धे एवं विधाः विषयाः समाज नित्यजीवनोपयोगिनः सर्वैः आचरणीयाः यत्नसाध्याश्च दृष्टा एव। अपि च तत्र तत्र बहूनि सुभाषितान्यपि समाजोपयोगीनि दृष्टानि।

**न जातु कामः कामानामुपयोगेन्त शाम्यति।**
**हविषा कृष्णवर्त्मेवभूय एवाभिवर्धते ।।**

(लि.पु.8/25)

अपि च सप्तषष्ठितमे अध्यायये दुराशा दुःखदायिनी तां वर्णयित्वा मनुष्यः सुखी भवतीति आत्यन्तिकं हितमुपदिष्टम्।(67/16-23)

आध्यात्मिक जीवने आत्याशाराहित्यं मनोवाक् कायकर्मशुद्धिः मितः नियतश्च आहारः कुटुम्बे भार्यायाः आनुकूल्यं दम्पत्योः आनुकूल्य सम्पादनं लक्ष्मीनिवास स्थानानीति बहवः सामाजिक जीवनोपयोगिनः विषयाः लिङ्गपुराणे निरुपिताः।

**सन्दर्भसूची –**


1. अमरकोष – चौखम्बा संस्कृतसंस्थान, वाराणासी, 1968
2. लिङ्गपुराणम् - चौखम्बा संस्कृतसंस्थान, वाराणासी, 1988
3. लिङ्गपुराणम् – गीताप्रेस, गोरखपुर, सं.- 2037
4. लिङ्गपुराण् – नागपब्लिसर्स, दिल्ली, 1984
5. लिङ्गपुराणम् – वङ्गवासिप्रेस, कोलकाता